# શ્રીવિષ્ણોરષ્ટોત્તરશતદિવ્યસ્થાનીયનામસ્તોત્રમ્

Shri Vishnorashtottarashatadivyasthaniyanama StotraM

sanskritdocuments.org

April 27, 2019

# Shri Vishnorashtottarashatadivyasthaniyanama StotraM

# શ્રીવિષ્ણોરષ્ટોત્તરશતદિવ્યસ્થાનીયનામસ્તોત્રમ્

## Sanskrit Document Information

Text title : viShNoraShTottarashatadivyasthAnIyanAmastotram

File name : viShNoraShTottarashatadivyasthAnIyanAmastotram.itx

Category : vishhnu, aShTottarashatanAma

Location : doc_vishhnu

Transliterated by : Karthik Raman karthik.raman at gmail.com

Proofread by : Karthik Raman karthik.raman at gmail.com

Latest update : April 27, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

April 27, 2019

*sanskritdocuments.org*

# શ્રીવિષ્ણોરષ્ટોત્તરશતદિવ્યસ્થાનીયનામસ્તોત્રમ્

અષ્ટોત્તરશતસ્થાનેષ્વાવિર્ભૂતં જગત્પતિમ્ ।
નમામિ જગતામીશં નારાયણમનન્યધીઃ ॥ ૧॥

શ્રીવૈકુણ્ઠે વાસુદેવમામોદે કર્ષણાહ્વયમ્ ।
પ્રદ્યુમ્નં ચ પ્રમોદાખ્યે સમ્મોદે ચાનિરુદ્ધકમ્ ॥ ૨॥

સત્યલોકે તથા વિષ્ણું પદ્માક્ષં સૂર્યમણ્ડલે ।
ક્ષીરાબ્ધૌ શેષશયનં શ્વેતદ્વીપેતુ તારકમ્ ॥ ૩॥

નારાયણં બદર્યાખ્યે નૈમિષે હરિમવ્યયમ્ ।
શાલગ્રામં હરિક્ષેત્રે અયોધ્યાયાં રઘૂત્તમમ્ ॥ ૪॥

મથુરાયાં બાલકૃષ્ણં માયાયાં મધુસૂદનમ્ ।
કાશ્યાં તુ ભોગશયનમવન્ત્યામવનીપતિમ્ ॥ ૫॥

દ્વારવત્યાં યાદવેન્દ્રં વ્રજે ગોપીજનપ્રિયમ્ ।
વૃન્દાવને નન્દસૂનું ગોવિન્દં કાલિયહ્રદે ॥ ૬॥

ગોવર્ધને ગોપવેષં ભવઘ્નં ભક્તવત્સલમ્ ।
ગોમન્તપર્વતે શૌરિં હરિદ્વારે જગત્પતિમ્ ॥ ૭॥

પ્રયાગે માધવં ચૈવ ગયાયાં તુ ગદાધરમ્ ।
ગઙ્ગાસાગરગે વિષ્ણું ચિત્રકૂટે તુ રાઘવમ્ ॥ ૮॥

નન્દિગ્રામે રાક્ષસઘ્નં પ્રભાસે વિશ્વરૂપિણમ્ ।
શ્રીકૂર્મે કૂર્મમચલં નીલાદ્રૌ પુરુષોત્તમમ્ ॥ ૯॥

સિંહાચલે મહાસિંહં ગદિનં તુલસીવને ।
ઘૃતશૈલે પાપહરં શ્વેતાદ્રૌ સિંહરૂપિણમ્ ॥ ૧૦॥

યોગાનન્દં ધર્મપુર્યાં કાકુલે ત્વાન્ધ્રનાયકમ્ ।
અહોબિલે ગારુડાદ્રૌ હિરણ્યાસુરમર્દનમ્ ॥ ૧૧॥

વિટ્ઠલં પાણ્ડુરઙ્ગે તુ વેઙ્કટાદ્રૌ રમાસખમ્ ।
નારાયણં યાદવાદ્રૌ નૃસિંહં ઘટિકાચલે ॥ ૧૨॥

વરદં વારણગિરૌ કાઞ્ચ્યાં કમલલોચનમ્ ।
યથોક્તકારિણં ચૈવ પરમેશપુરાશ્રયમ્ ॥ ૧૩॥

પાણ્ડવાનાં તથા દૂતં ત્રિવિક્રમમથોન્નતમ્ ।
કામાસિક્યાં નૃસિંહં ચ તથાષ્ટભુજસઙ્ગકમ્ ॥ ૧૪॥

મેઘાકારં શુભાકારં શેષાકારં તુ શોભનમ્ ।
અન્તરા શિતિકણ્ઠસ્ય કામકોટ્યાં શુભપ્રદમ્ ॥ ૧૫॥

કાલમેઘં ખગારૂઢં કોટિસૂર્યસમપ્રભમ્ ।
દિવ્યં દીપપ્રકાશં ચ દેવાનામધિપં મુને ॥ ૧૬॥

પ્રવાલવર્ણં દીપાભં કાઞ્ચ્યામષ્ટાદશસ્થિતમ્ ।
શ્રીગૃધ્રસરસસ્તીરે ભાન્તં વિજયરાઘવમ્ ॥ ૧૭॥

વીક્ષારણ્યે મહાપુણ્યે શયાનં વીરરાઘવમ્ ।
તોતાદ્રૌ તુઙ્ગશયનં ગજાર્તિઘ્નં ગજસ્થલે ॥ ૧૮॥

મહાબલં બલિપુરે ભક્તિસારે જગત્પતિમ્ ।
મહાવરાહં શ્રીમુષ્ણે મહીન્દ્રે પદ્મલોચનમ્ ॥ ૧૯॥

શ્રીરઙ્ગે તુ જગન્નાથં શ્રીધામે જાનકીપ્રિયમ્ ।
સારક્ષેત્રે સારનાથં ખણ્ડને હરચાપહમ્ ॥ ૨૦॥

શ્રીનિવાસસ્થલે પૂર્ણં સુવર્ણં સ્વર્ણમન્દિરે ।
વ્યાઘ્રપુર્યાં મહાવિષ્ણું ભક્તિસ્થાને તુ ભક્તિદમ્ ॥ ૨૧॥

શ્વેતહ્રદે શાન્તમૂર્તિમગ્નિપુર્યાં સુરપ્રિયમ્ ।
ભર્ગાખ્યં ભાર્ગવસ્થાને વૈકુણ્ઠાખ્યે તુ માધવમ્ ॥ ૨૨॥

પુરુષોત્તમે ભક્તસખં ચક્રતીર્થે સુદર્શનમ્ ।
કુમ્ભકોણે ચક્રપાણિં ભૂતસ્થાને તુ શાર્ઙ્ગિણમ્ ॥ ૨૩॥

કપિસ્થલે ગજાર્તિઘ્નં ગોવિન્દં ચિત્રકૂટકે ।
અનુત્તમં ચોત્તમાયાં શ્વેતાદ્રૌ પદ્મલોચનમ્ ॥ ૨૪॥

પાર્થસ્થલે પરબ્રહ્મ કૃષ્ણાકોટ્યાં મધુદ્વિષમ્ ।
નન્દપુર્યાં મહાનન્દં વૃદ્ધપુર્યાં વૃષાશ્રયમ્ ॥ ૨૫॥

અસઙ્ગં સઙ્ગમગ્રામે શરણ્યે શરણં મહત્ ।
દક્ષિણદ્વારકાયાં તુ ગોપાલં જગતાં પતિમ્ ॥ ૨૬॥

સિંહક્ષેત્રે મહાસિંહં મલ્લારિં મણિમણ્ડપે ।
નિબિડે નિબિડાકારં ધાનુષ્કે જગદીશ્વરમ્ ॥ ૨૭॥

મૌહૂરે કાલમેઘં તુ મધુરાયાં તુ સુન્દરમ્ ।
વૃષભાદ્રૌ મહાપુણ્યે પરમસ્વામિસઞ્જ્ઞકમ્ ॥ ૨૮॥

શ્રીમદ્વરગુણે નાથં કુરુકાયાં રમાસખમ્ ।
ગોષ્ઠીપુરે ગોષ્ઠપતિં શયાનં દર્ભસંસ્તરે ॥ ૨૯॥

ધન્વિમઙ્ગલકે શૌરિં બલાઢ્યં ભ્રમરસ્થલે ।
કુરઙ્ગે તુ તથા પૂર્ણં કૃષ્ણામેકં વટસ્થલે ॥ ૩૦॥

અચ્યુતં ક્ષુદ્રનદ્યાં તુ પદ્મનાભમનન્તકે ।
એતાનિ વિષ્ણોઃ સ્થાનાનિ પૂજિતાનિ મહાત્મભિઃ ॥ ૩૧॥

અધિષ્ઠિતાનિ દેવેશ તત્રાસીનં ચ માધવમ્ ।
યઃ સ્મરેત્સતતં ભક્ત્યા ચેતસાનન્યગામિના ॥ ૩૨॥

સ વિધૂયાતિસંસારબન્ધં યાતિ હરેઃ પદમ્ ।
અષ્ટોત્તરશતં વિષ્ણોઃ સ્થાનાનિ પઠતા સ્વયમ્ ॥ ૩૩॥

અધીતાઃ સકલા વેદાઃ કૃતાશ્ચ વિવિધા મખાઃ ।
સમ્પાદિતા તથા મુક્તિઃ પરમાનન્દદાયિની ॥ ૩૪॥

અવગાઢાનિ તીર્થાનિ જ્ઞાતઃ સ ભગવાન્ હરિઃ ।
આદ્યમેતત્સ્વયં વ્યક્તં વિમાનં રઙ્ગસઞ્જ્ઞકમ્ ।
શ્રીમુષ્ણં વેઙ્કટાદ્રિં ચ શાલગ્રામં ચ નૈમિષમ્ ॥ ૩૫॥

તોતાદ્રિં પુષ્કરં ચૈવ નરનારાયણાશ્રમમ્ ।
અષ્ટૌ મે મૂર્તયઃ સન્તિ સ્વયં વ્યક્તા મહીતલે ॥ ૩૬॥

॥ ઇતિ શ્રીવિષ્ણોરષ્ટોત્તરશતદિવ્યસ્થાનીયનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Karthik Raman karthik.raman at gmail.com

*Shri Vishnorashtottarashatadivyasthaniyanama StotraM*

pdf was typeset on April 27, 2019

Please send corrections to *sanskrit@cheerful.com*